दिनाङ्क :-08.11.2024

प्रात: - 06:55

<u>विदेशमन्त्रालयः</u>

विदेशमन्त्रालयेन उक्तं यत् भारतमेरिकादेशयोः मध्ये सहभागिता बहुपक्षीया विशिष्टा च अस्ति। ह्य: नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी निर्वाचितराष्ट्रपतिना डोनाल्ड-ट्रम्पेण सह संवादं कृतवान्। संवादावसरे प्रधानमन्त्री उक्तवान् यत् भारतम् अमेरिकया सह व्यापकवैश्विकीं सामरिकीं च सहभागितां भूयोऽपि सुदृढां कर्तुम् उत्सुकम् अस्ति। श्रीजायसवालः अवदत् यत् भारतम् अमेरिका च जनानां हितं शान्तिं सुरक्षां च सुनिश्चेतुं कार्यं करिष्यत:। अपरत:, कनाडादेशस्य टोरोन्टोनगरे केषाञ्चन निर्धारित-वाणिज्यदूतावास-शिबिराणां निरस्तीकरण-प्रकरणे श्रीजायसवालः अवदत् यत् कनाडासर्वकारेण पर्याप्त-सुरक्षा-विषयकम् आश्वासनं न दत्तम्, अत एव एतेषां शिविराणां निरसनं जातम्।

<u>अमितशाह:/सम्मेलनम्</u>

केन्द्रीयगृहमन्त्री अमितशाहः उक्तवान् यत् आतङ्कवादस्य आतङ्कवादिनां च पारिस्थितिकीतन्त्रं विरुध्य सर्वकारः शीघ्रमेव राष्ट्रियातङ्कवादरोधि-नीतिं प्रस्तोष्यति। नवदिल्ल्यां ह्य: एन्आईए इति राष्ट्रियान्वीक्षणाभिकरणेन आयोजितस्य द्विदिवसीयस्य आतङ्कवादरोधि-सम्मेलनस्य उद्घाटनं कुर्वन् श्रीशाहः अवदत् यत् विगतेषु दशवर्षेषु प्रधानमन्त्रिणः नरेन्द्रमोदिनः कार्यभार-ग्रहणानन्तरम् आतङ्कवादं विरुध्य शक्त: संकल्प: सर्वकारेण कृत:। श्रीशाहः अवदत् यत् विगतेषु दशवर्षेषु आतङ्कवादविरुद्धं कार्याचरणाय देशे एकः शक्तः पारिस्थितिकीतन्त्रः विकसितः। सः अवदत् यत् षडधिक-द्विसहस्रतमवर्षतः त्रयोदशोत्तर-द्विसहस्रतम-वर्षाणां कालखण्डस्य अपेक्षया चतुर्दशोत्तर-द्विसहस्रतः एकविंशत्यधिक-द्विसहस्रतमवर्ष-पर्यन्तं आतङ्कवादि-घटनासु सप्तति-प्रतिशतं न्यूनता आकलिता।

केन्द्रीय-गृहमन्त्री अवदत् यत् आतङ्कवादिनम् आक्रमणानि तेषां षड्यन्त्रं च सीमारहितया अदृश्यरूपेण च देशं दुष्प्रभावयन्ति। सः यूनाम् अधिकारिणां कृते विशेषप्रशिक्षणस्य आवश्यकतायां बलं दत्तवान्।

सर्वोच्चन्यायालयः/नियुक्तिनियमाः

सर्वोच्चन्यायालयेन ह्यः निर्णयः कृतः यत् सर्वकारीयकार्येषु नियुक्तिनियमाः तावत् पर्यन्तं न परिवर्तितुं शक्यन्ते यावत् पर्यन्तं किमपि निर्धारणं न भवति। मुख्यन्यायाधीशस्य डी.वाई.चन्द्रचूडस्य नेतृत्वे पञ्चन्यायाधीशपीठस्य मतानुसारि एकदा नियुक्तिप्रक्रियायाः आदौ पूर्वं निर्धारिताः 'क्रीडायाः नियमाः' मध्ये परिवर्तितुं न शक्यन्ते। न्यायालयेन उक्तं यत् चयननियमाः संविधानस्य चतुर्दश-सङ्ख्याकस्य अनुच्छेदस्य अनुरूपाः एव भवेयुः।

भारतीयरेलविभागः

यात्रिणां सुविधायै भारतीयरेलवे अद्य आरभ्य चतुष्षष्ट्यधिकैकशतानि विशिष्ट-रेलयानानि चालयिष्यति। यात्रिणः उत्सवे भागं भजित्वा पुनः गन्तव्यस्थानं प्रत्यागमिष्यन्ति। भारतीयरेल-विभागस्यानुसारि विगतषट्त्रिंशद्दिनेषु प्रायः सार्द्धचतुस्सहस्र-रेलयानेषु पञ्चषष्टिलक्षमिताः यात्रिणः गमनागमनं कृतवन्तः।

क्रिकेट्

भारत-दक्षिणाफ्रीकयोः विंशतिं प्रतिविंशति-क्रिकेट्-स्पर्धा-शृङ्खलायाः प्रथमं द्वन्द्वम् अद्य रात्रौ सार्धाष्ट-वादने डरबने भविष्यति। स्पर्धा-चतुष्टयात्मिकायाः अस्याः शृङ्खलायाः अन्याः स्पर्धाः नवम्बर-मासस्य दशमे, त्रयोदशे पञ्चदशे च दिनाङ्केषु आयोजयिष्यन्ते।

।।इति वार्ताः।।